अ.क्र.६४

स्तोत्र

# संस्कृत

# ॥ मांगिरीश ॥

मांगिसहस्रनामस्तोत्र

६१८/स्तो-382


Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(1)

# अथ मांगिशाष्टक मांगीशसहस्र नामस्तोत्र व सहस्रनामाव- ळी प्रारंभ.

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)



Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

श्रीगणाधिपतयेनमः ॥ अथमांगिरीशाष्टकप्रारंभः ॥ वारि-
जाक्षउवाच ॥ एवमुक्तंभगवतासाक्षात्परशिवेनमे ॥ तदा
कुशस्थलींगत्वातल्लिंगंपूजितंमया ॥१॥ भक्त्यासंपूजितोदे-
वोमांगिरीशोमहेश्वरः ॥ मांगिरीशाष्टकमिदंतत्प्रीत्यैपठितंमया ॥२॥ विश्वेश्वरप्रणतदुःखविनाशकारिन् ॥ सर्वेष्टपूरक
परात्परपापहारिन् ॥ कुंदेंदुशंखधवलश्रुतगीतकीर्ते ॥ भो
मांगिरीशतवपादयुगंनमामि ॥३॥ गंगाधरस्वजनपालन-
शोकहारिन् ॥ शक्रादिसंस्तुतगुणप्रमथाधिनाथ ॥ खंडेंदुशे-
खरसुरेश्वरभव्यमूर्ते ॥ भोमां० ॥४॥ त्रैलोक्यनाथमदनांत-
कशूलपाणे ॥ प्रापौघनाशनपटोपरमप्रतापिन् ॥ लोमेश

 विप्रवरदायककालशत्रो ॥ भोमां०॥५॥ भोभूतनाथभवभं 
 जनसर्वसाक्षिन् ॥ मृत्युंजयांधकनिषूदनविश्वरूप ॥ भोसं
गमेश्वरसदाशिवभालनेत्र ॥ भोमां०॥६॥ अंभोजसंभव-
रमापतिपूजितांघ्रे ॥ यक्षेंद्रमित्रकरुणामयकायशंभो ॥ वि
द्यानिधेवरददीनजनैकबंधो ॥ भोमां०॥७॥ रुद्राक्षभूषि
त तनोमृगशावहस्त ॥ घोरांधकारमिहिरश्रितभालनेत्र ॥
गोत्राधरेंद्रतनयांकितवामभाग ॥ भोमां०॥८॥ कैलास-
नाथकलिदोषविनाशदक्ष ॥ धुत्तूरपुष्पपरमप्रियपंचवक्त्र ॥
श्रीवारिजाक्षकुलदैवतकामशत्रो ॥ भोमां०॥९॥ योगींद्र 
हृत्कमलकोशसदानिवास ॥ ज्ञानप्रदायकशरण्यदुरंतश-

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(3A)

त्स्ये ॥ यज्ञेशयज्ञफलदायकयज्ञमूर्ते ॥ भोमां० ॥ १० ॥ ये
मांगिरीशचरणस्मरणानुरक्ता ॥ मांगीश्वराष्टकमिदंसततं
पठंति ॥ आमुष्मिकंसकलसौख्यमपीहभुक्ता ॥ देहांतका-
लसमयेशिवतांव्रजंति ॥ ११ ॥ मांगिरीशस्थितस्यैवसहस्त्रै
र्दिव्यनामभिः ॥ स्तुतः सप्रापान्देवो मांगिरीशो जगद्गुरुः
॥ १२ ॥ तेनपुण्यप्रभावेनतन्निष्ठस्तत्परायणः ॥ त्रिषुलोके-
षुवंद्योहं प्रभवंवारिलक्षणः ॥ १३ ॥ अनुग्रहेणतस्यैवमांगी
शस्यपरात्मनः ॥ सामर्थ्यमतुलंप्राप्यविख्यातोऽस्मिन्जग-
त्रये ॥ १४ ॥ अस्यप्रसादमात्रेण ब्राम्हणेंद्रमयायुधि ॥ शूल
दंतादयोदैत्यानिहताः कालसंन्निभाः ॥ १५ ॥ दुर्बलेनमे-

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

नुष्येणदरिद्राःपणकादयः॥ अस्यानुग्रहसामर्थ्याद्भाग्य
वंतःकृतामया॥१६॥ अस्यकृपातिरेकेणमांगीशस्यम-
हेशितुः॥ मुखमंध्येविश्वरूपंजनन्यैदर्शितंमया॥१७॥
अस्यानुकंपयादीनमानवेनाध्वगामिना॥ सुशीलबाल
कप्रेतंमयासंजीवितंकृतं॥१८॥ अतोस्यमांगिरीशस्य
प्रसादःसर्वसिद्धिदः॥ चतुर्दशसुलोकेषुकस्यनोत्पत्ति
कारकः॥१९॥ तस्मात्त्वमपिजीवेशभक्तिसंविष्टमानसः
॥ मांगीशाख्यंमहालिंगमिदंसेवयसेवय॥२०॥ एतस्मा
त्परमंलिंगंनान्यदस्तिमहीतले॥ सत्यंसत्यंपुनःसत्यंस-
त्यमेवोच्यतेमया॥२१॥ अगस्त्यउवाच॥ श्रुत्वेदंवा-



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(5A)

सुदेवोक्तं जीवेशो द्विजपुंगवः ॥ पुनःप्रश्नंसमकरोज्जि
ज्ञासुःकुलसंभवः ॥२२॥जीवेशउवाच ॥ मांगीशलिंग
माहात्म्यं यत्त्वयोक्तंमयाधुना ॥ सविस्तारं तदाकर्ण्य संतो
षोमेमहानभूत् ॥२३॥मांगीशो भगवानीशस्त्वयायैर्नाम
भिःस्तुतः ॥ तानिनामानिमामद्य कृपयावक्तुमर्हसि ॥२४॥
अगस्त्यउवाच ॥ एवंजीवेशसंपृष्टः श्रीमद्वारिजलोचनः
॥ मांगीशनामसाहस्त्रंप्राहेदंसर्वसिद्धिदं ॥२५॥वारिजाक्ष
उवाच ॥ शृणुजीवेशवक्ष्यामिमांगीशाख्यसहस्त्रकं ॥ य-
स्यस्मरणमात्रेणनरोनिष्पांतकोभवेत् ॥२६॥ इतिश्रीवा
रिजाक्षप्रोक्तंमांगिरीशाष्टकं संपूर्णं ॥छ॥ ॥ ॥छ॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अथमांगीशसहस्रनामस्तोत्रप्रारंभः ॥ ॐ अस्यश्रीमांगिरीषसहस्रनामस्तोत्रमंत्रस्य वामकेश्वरो भगवानृषिः अनुष्टुपछंदः श्रीमांगिरीशोदेवता ॐ नमइतिबीजं भगवतेइतिशक्तिः मांगिरीशायेतिकीलकं ममश्रीमांगिरीशप्रसादसिध्यर्थेजपेविनियोगः अथन्यासः ॐ नमः अंगुष्ठाभ्यांनमः भगवतेतर्जनीभ्यांनमः मांगिरीशायमध्यमाभ्यांनमः ॐ नमः अनामिकाभ्यांनमः भगवते कनिष्टिकाभ्यांनमः मांगिरीशायकरतलकरपृष्ठाभ्यांनमः एवंहृदयादिन्यासः अथध्यानं शिरसिधृतशशांकंपार्वतीशोभितांकं ॥ दशभुजम-



Rajawade Sanshodhen Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the

(5A)

मरेंद्राद्यर्चनीयांघ्रियुग्मं ॥ स्फटिकधवलगात्रंपंचवक्त्रं-
त्रिनेत्रं ॥ सकलजगदधीशंचिंतयेमांगिरीशं ॥ १ ॥ इति
ध्यानं ॥ ॐ मांगिशोमाधवस्तुत्योमहाभागोमहोमयः
॥ मीदुष्टमोमुनिध्येयोमंदारकुसुमप्रियः ॥ १ ॥ मायावीम
हदाराध्योमहापूज्योमनोमयः ॥ मृत्युंजयोमृडानीशोमार्कं
डेयप्रियोमुनिः ॥ २ ॥ मुक्तिप्रदायकोमुक्तोमेधावीमधुरोमधुः
॥ मेधातिथिर्मृगधरोमहाप्रज्ञोमहोत्सवः ॥ ३ ॥ महोत्सिक्तो-
महायोगीमहौजस्कोमहौषधः ॥ महाभोगीमहाभार्योमहर्षि
मंडनप्रियः ॥ ४ ॥ महाबुद्धिर्महाबोधोमहानादोमहायुधः ॥
मृदंगनादमुदितोमहाध्यानपरायणः ॥ ५ ॥ मखोमुख्योमहा-

Joint project of the Rajawade Sanshodhan Mandal ... Yashwantrao Chavan Pratishthan, Mumbai.

(6)

मांगि० | ज्ञानीमहोराशिर्महोदधिः ॥ मंदाकिनीधरोमौनीमृग्योमरदफ | स्तो०
। ॥४॥ | लप्रदः ॥६॥ महाशनोमहासेनोमहासत्वोमहाबलः ॥ महे

ष्वासोमृगांकाभोमुनींद्रोमेरवलाधिपः ॥ ७ ॥ मुकुंदोमंजु-
लोमुक्तिप्रदातामानंदायकः ॥ मंजुलांगोमहोदार्योमहोदा
रोमहत्वगः ॥८॥ महानंदोमहीरूपोमत्र्झोमहिमाश्रयः ॥
महर्धिर्मुदितोमहर्षोमहापातकनाशनः ॥९॥ गिरीशोगर्व-
हागोप्तागुहावासीगजाजिनः ॥ गौरीभर्त्तागुणाधारोगणा
ध्यक्षोगणाधिपः ॥१०॥ गरिष्ठोगुणातीतोगंगालंकृत-
मस्तकः॥ गभीरोगिरिजामातागुणेशोगरळाशनः ॥११॥ ॥४॥
गूढोगिरिचरोगुप्तोगुह्योगंधर्वप्रियोगिरिः ॥ गंगाधरोगजरि-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(6A)

पुर्गहनोगोपतिर्ध्वजः ॥१२॥ गीर्वाणवंदितपदोगुणज्ञोग्री
ष्मवर्जितः ॥ गतिप्रियोगयाधारोगंगांगोगोधनप्रियः॥१३॥
गणस्तुस्त्योगणाधीशोगणाराध्योगणाश्रयः ॥ गणनाथोग-
णव्रातोगणाकारोगणेश्वरः ॥१४॥ शमीशावः शुभः श्लो-
क्यःशिपिविष्टःशिवाप्रियः॥ सिद्धांगः श्रीपदः शक्रः शांतः
श्रेयः प्रदायकः ॥१५॥ शंभवः शूलभृच्छ्रीमानशांतिभद्रः
शतक्रतुः ॥ शशांकशेखरः शेषः श्रमणः श्रमहारकः ॥
१६॥ जगत्पितानिराधारः शुद्धोबुध्दोनिरंजनः ॥ पिनाकी
केवलःकालःसर्पभुषःपुरंदरः ॥१७॥ निरातंकश्चतुर्भा-
गःपरात्मापार्वतीपतिः॥ महादेवोगुणातीतःपरमात्मापरावरः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥१८॥ निराकारोनिरालंबः सोमनाथः सहस्रपात् ॥ सहस्र
वदनः सिद्धः सहस्रनयनः कविः ॥१९॥ गंगाधरोनागना-
थः केदारः कामशासनः ॥ कालहंताजगध्दाताजगन्नेता
जगद्गुरुः ॥२०॥ भूपतिःपुरविध्वंसीकैवल्यःशोकशासनः॥
हरिकेशःपंचवक्रःपंचवर्णःपरात्परः॥२१॥पंचाक्षरःपवित्रात्माव्यो
मकेशोविपत्पतिः॥ अनंतमायीधर्मिष्ठोव्याघ्रचर्मांबरोम-
हान् ॥२२॥ जगत्संहारकोहेतुर्विश्वसाक्षीवृषध्वजः॥ वि-
ष्णुगर्वहरोनाथः कैवल्यफलदायकः ॥२३॥ दशहस्तःसु-
खीयोगीसारः सारविदांवरः ॥ भस्मप्रियोविश्वमातामनस्वी
भवभंजनः ॥२४॥ दयालुः पुरुषोज्ञानीमायातीतोमहे-




Rajwade Sanshodhan Mandal, Dhule and ... Yashwantrao Chavan Pratishthan, Mumbai ... joint project of the

श्वरः ॥ योगिहृत्पद्मसंवासी सद्योजातो वरप्रदः ॥ २५ ॥ प्रसिद्धः
पावनः स्वेच्छास्वरूपः शापमोचनः ॥ अंधकासुरसंहर्ता गिरेशो
नीललोहितः ॥ २६ ॥ धनेशः शरभस्तीर्थः पवित्रः पूषदंतहृत्
॥ महाकालो हविर्वैद्यो निरीहस्त्र्यंबकः शुचिः ॥ २७ ॥ सिद्धेश्व
रः सिद्धिदाता सर्वदेवमयो भवः ॥ अलंघ्यशक्तिर्जटिलो विरागः
सुमनोहरः ॥ २८ ॥ महात्मा निरहंकारी विश्वरूपी विकर्तनः ॥
कृशानुरेताः सर्वज्ञो गजचर्मधरोऽजडः ॥ २९ ॥ निधीशो नि
स्पृहः सोमस्वरूपी वेदवल्लभः ॥ विबुधात्मा पशुपतिर्विशुद्धः
शंकरः शिवः ॥ ३० ॥ भीमः शंभुर्हंसनाथः प्रसिद्धः सर्ववंदि-
तः ॥ शितिकंठः शूलहस्तः श्रीकंठः पूर्वजः पतिः ॥ ३१ ॥ आ

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥६॥

त्मारामः कृपासिंधुः परमेष्ठीपुरातनः ॥ निरामयः सुरेशानोगा-
यत्रीवल्लभोवरः ॥ ३२ ॥ निर्विकल्पोनीलकंठः कामीविप्रः
प्रता .वान्,विश्वेश्वरोवामदेवउग्रः सूर्योगिरीश्वरः ॥ ३३ ॥ मृत्यु
हर्तावीरभद्रः कपर्दीयोगीवित्तमः ॥ ॐकाररूपोभीमेशोगोव
र्धनगतःप्रभुः ॥ ३४ ॥ जगज्जीवः कालकूटोविषादीदक्षनाश
नः ॥ गोष्ठ्यःप्रजेशः प्रथमः परमार्थः शिवाधवः ॥ ३५ ॥ ज-
गत्प्राणोविभुर्वज्रीदुंदुभीमथनाबलः ॥ इंद्रहंतानंतमूर्तिः काल
हस्तोनिरक्षरः ॥ ३६ ॥ सोमेश्वरः सुधेशानोमहापापापहारकः
॥ अजातशत्रुः कैलासपतिर्देवगणाश्रयः ॥ ३७ ॥ रुद्रोहंसः
सूक्ष्मतनुर्हितकारीसहस्रजित् ॥ भव्यः पूज्योवन्हिमूर्तिर्मही

8A

यान् भाललोचनः ॥३८॥ यज्ञःश्रीशैलसंस्थायीजयरूपोज

यमदः॥ नंदीब्रम्हशिरश्छेत्तानिर्मूलःकालशिक्षकः ॥३९॥ जलंधरशिरश्छेत्तासुचक्षुःसेवकावनः॥ मंत्रोमंत्रीमंत्रवेत्तादेवोदारिघ्ननाशनः ॥४०॥ महेशःपरमःस्पष्टःसोमःसौम्यःसुखीसुराट् ॥ अमृतेशःपारिजातःपंचवक्त्रःप्रियंवदः ॥४१॥ दक्षोधन्वीगिरिज्ञानामायीघंटारवप्रियः॥ कुबेरबंधुर्विभवःकौबेरःकल्मषापहः ॥४२॥ विद्यानांविभागःशूरःपुण्यश्लोकोऽभयोऽमरः॥ जगदीशोजगन्नाथःकनिष्ठोवामनोमहः ॥४३॥ चतुर्हस्तस्तत्पुरुषःपुष्टानांपतिरव्ययः॥ विशालाक्षोऽज्ञानगम्यस्तरुणःकरुणानिधिः ॥४४॥ हिरण्यःपुण्यदोन्हस्वोमहाल्हादोम-

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

॥७॥ नोन्मनः ॥ धर्मपूर्णः श्वेतरूपोऽगतभोबहुरूपधृक् ॥४५॥
विषमियोविरूपाक्षःसुषेणःसर्ववंदितः ॥ वृत्थोवरिष्ठःशिष्टे
ष्टोगरिष्ठःकष्टनाशनः ॥४६॥ सहस्रहस्तोनिःशंकःपंक-
जासनसंस्तुतः ॥ जाह्नवीजनकोवेधाजन्ममृत्युहरोहरः
॥४७॥ परोऽनर्घ्यःकालकल्पोविशालःपालितामरः ॥ शर्वो
भर्गःपीतवर्णःपूर्णोज्ञानप्रकाशकः ॥४८॥ भूपतिर्जन
कःसिंहोनरसिंहनिपातनः ॥ नित्यःकांतःकल्मषारिःश्वेत
न्यग्रजरोगुरुः ॥४९॥ उच्चैर्घोषःस्वर्णरेतानिर्व्याधिःस्तेन-
रक्षकः ॥ व्युप्तकेशोजगत्कर्ताविव्याधिःपावकाकृतिः ॥५०॥ ॥७॥
औषधीशस्तस्करेशोमंत्रात्मापरिवंचकः ॥ गुह्येष्टदःपरिच-

" Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

रः कक्षेशोवारिवस्कृतः ॥५१॥ भुवंतिरुभ्रतः शूलीपंचको
विश्वलोचनः ॥ हिरण्यबाहुरचलोवर्षीयान्वननायकः॥५२
सस्पिंजररस्तकपतिः स्तारः सूर्म्योभयापहः ॥ घोररूपः कृत्स्न
वीतः सहमानः शतानन: ॥५३॥ वाणिजोरोहितः सूतः श्वो
तस्यः क्षेत्रपालकः ॥ अहन्त्यात्मामहारुद्रः पुष्टेशस्तत्पति
र्बलिः ॥५४॥ आततायीनाविकेशोबभ्रुषः क्षेमकारकः ॥
बुध्न्योजघन्यः क्षेत्रेशः संसारारव्यः स्मरांगधृक् ॥५५॥ नि
षंगीककुभः शीभ्यः पत्तीशोनिरुपप्लवः ॥ अरण्येशोगिरिच
रः सर्वलोकाभिवंदितः ॥५६॥ श्रुतसेनोमहावीरः पूतात्माकु
शलोमनुः ॥ सदागतिः प्रसन्नात्मावदान्योवरदायकः ॥५७

9A
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

सुधन्वाप्यहितःस्वल्प: क्षेम्य: पथ्य: पयोधरः ॥ बिल्मीवरूथी कवचीवास्तव्य: शारूत्रिक्तमः ॥५८॥ आव्याधिनीशो निर्द्वंद्वोदुराराध्योदुरासदः ॥ अमोघोविक्रमोभव्यः कुमारः कोमलाशयः ॥५९॥ अभगःभाविश्वमूर्धानीप्यः काट्यो वसुप्रदः ॥ विश्वबाहुर्विश्वचक्षुः स्वायुधोवेदसंमतः ॥६०॥ नाद्यः सहस्योवैशन्तः सूद्यः सत्यः सभापतिः॥ अलोलुपोभूतमूर्तिःसारग्राहीमयस्करः ॥६१॥ प्रावाह्यःसारभूतात्मा मोक्षदःसत्यसंगरः ॥ ईरिण्यः खंडपरशुरातार्यः कीर्तिसागरः ॥६२॥ अग्रेवधोभीमकर्मापार्यःशिवतरः सुहृत् ॥ शंगस्ताम्रः पर्णशद्योमहदाभूतिभूषणः ॥६३॥ दुरत्ययो

(10A)

निष्मपंचोयज्ञविघ्नविनाशनः ॥ यज्ञेशःक्षपणोयंता पुलस्त्यः
सत्वविक्तमः ॥६४॥ सिकत्योग्रामणीःसम्राट् अनर्थोनिरु
पप्लवः ॥ शरण्यःपुण्यसंदायीसत्वनिष्ठो मङ्गालकः ॥६५॥
पंचोब्रम्हमयोव्यक्तःसुदेवोभूधरायुधः ॥ उत्तारणःसत्वमूर्तिः
फेन्योदेवशिरवामणिः ॥६६॥ रुद्राक्षवक्षकःशष्प्यस्तार्येज्ञः
कामशासनः ॥ आलाद्योभूतहालोप्योहृदयःसत्ववित्सुधीः
॥६७॥उच्चःप्रतरणस्तीर्थ्यः कूल्योदूरेवधोऽरुणः ॥ कात्या
यनीप्रि योलप्यःसत्क्रियःसुप्रतापनः ॥६८॥ पांसव्योवास्तु
पोवात्यो विद्युत्योयज्ञनायकः ॥ अनातुरोयज्ञभोक्ताहरि-
त्यो निरुपाधिकः ॥६९॥ रुद्राक्षरूपोनियतोरजस्योम-

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com